# ॥ श्रीक्षेत्र नारायण स्तोत्रम् ॥

ब्रह्मोवाच

केषु केषु च क्षेत्रेषु द्रष्टव्योसि मया हरे ।

भक्तैरन्यैः सुरश्रेष्ठ मुक्तिकामैर्विशेषतः ॥

यानि ते गुह्यनामानि क्षेत्राणि च जगत्पते ।

तान्यहं श्रोतुमिच्छामि त्वत्तः पद्मायतेक्षण ॥

किं जपन्सुगतिं याति नरो नित्यमतन्द्रितः ।

त्वद्भक्तानां हितार्थाय तन्मे वद सुरेश्वर ॥

श्रीभगवानुवाच

शृणुष्वावहितो ब्रह्मन् गुह्यनामानि मेऽधुना ।

क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि तत्त्वतः ॥

कोकामुखे तु वाराहं मन्दरे मधुसूदनम् ।

अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम् ॥

नारायणं तु वैकुण्ठे महेन्द्रे तु नृपात्मजम्।

ऋषभे तु महाविष्णुं द्वारकायां तु भूपतिम्॥

पाण्डुसह्ये तु देवेशं वसुरूढे जगत्पतिम्।

वल्लीतटे महायोगं चित्रकूटे नराधिपम्॥

निमिषे पीतवासं च गवां निष्क्रमणे हरिम्।

शालग्रामे तपोवासमचिन्त्यं गन्धमादने॥

कुब्जागारे हृषीकेषं गन्धद्वारे पयोधरम्।

गरुडध्वजं तु सकले गोविन्दं नाम सायके॥

वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम्।

केदारे माधवं विन्द्याद्वारणस्यां तु केशवम्॥

पुष्करे पुष्कराक्षं तु धृष्टद्युम्ने जयध्वजम्।

तृणबिन्दुवने वीरमशोकं सिन्धुसागरे॥

कसेरटे महाबाहुममृतं तैजसे वने।

विश्वासयूपे विश्वेशं नरसिंहं महावने॥

हलाङ्गरे रिपुहरं देवशालां त्रिविक्रमम्।

पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः॥

विद्याधरं वितस्तायां वाराहे धरणीधरम्।

देवदारुवने गुह्यं कावेर्यां नागशायिनम्॥

प्रयागे योगमूर्तिं च पयोष्ण्यां च सुदर्शनम्।

कुमारतीर्थे कौमारं लोहिते हयशीर्षकम्॥

उज्जयिन्यां त्रिविक्रमं लिङ्गकूटे चतुर्भुजम्।

हरिहरं तु भद्रायां दृष्ट्वा पापात्प्रमुच्यते॥

विश्वरूपं कुरुक्षेत्रे मनिकुण्डे हलायुधम्।

लोकनाथमयोध्यायां कुण्डिने कुण्डिनेश्वरम्॥

भाण्डारे वासुदेवं तु चक्रतीर्थे सुदर्शनम्।

आढ्ये विष्णुपदं विद्याच्छूकरे सूकरं विदुः॥

ब्रह्मेशं मानसे तीर्थे दण्डके श्यामलं विदुः।

त्रिकूटे नागमोक्षं च मेरुपृष्ठे च भास्करम्॥

विरजं पुष्पभद्रायां बालं केरळके विदुः।

यशस्करं विपाशायां माहिष्मत्यां हुताशनम्॥

क्षीराब्धौ पद्मनाभं तु विमले तु सनातनम् ।

शिवनद्यां शिवकरं गयायां च गदाधरम् ॥

सर्वत्र परमात्मानं यः पश्यति स मुच्यते ।

अष्टषष्टिश्च नामानि कथितानि मया तव ॥

क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः ।

एतानि मम नामानि रहस्यानि प्रजापते ॥

यः पठेत्प्रातरुत्थाय शृणुयाद्वापि नित्यशः ।

गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ॥

दिनेदिने शुचिर्भूत्वा नामान्येतानि यः पठेत् ।

दुःस्वप्नं न भवेत्तस्य मत्प्रसादान्न संशयः ॥

अष्टषष्टि तु नामानि त्रिकालं यः पठेन्नरः ।

विमुक्तः सर्वपापेभ्यो मम लोके स मोदते ॥

द्रष्टव्यानि यथा शक्त्या क्षेत्राण्येतानि मानवैः ।

वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम् ॥

सूत उवाच

हरिं समभ्यर्च्य तदग्रसंस्थितो

हरिं स्मरन् विष्णुदिने विशेषतः ।

इमं स्तवं यः पठते समानवः

प्राप्नोति विष्णोरमृतात्मकं पदम् ॥

॥ इति शिवम् ॥

## || śrīkṣetra nārāyaṇa stotram ||

brahmovāca

keṣu keṣu ca kṣetreṣu draṣṭavyosi mayā hare |

bhaktairanyaiḥ suraśreṣṭha muktikāmairviśeṣataḥ ||

yāni te guhyanāmāni kṣetrāṇi ca jagatpate |

tānyahaṁ śrotumicchāmi tvattaḥ padmāyatekṣaṇa ||

kiṁ japansugatiṁ yāti naro nityamatandritaḥ |

tvadbhaktānāṁ hitārthāya tanme vada sureśvara ||

śrībhagavānuvāca

śṛṇuṣvāvahito brahman guhyanāmāni me'dhunā |

kṣetrāṇi caiva guhyāni tava vakṣyāmi tattvataḥ ||

kokāmukhe tu vārāhaṁ mandare madhusūdanam |

anantaṁ kapiladvīpe prabhāse ravinandanam ||

nārāyaṇaṁ tu vaikuṇṭhe mahendre tu nṛpātmajam |

ṛṣabhe tu mahāviṣṇuṁ dvārakāyāṁ tu bhūpatim ||

pāṇḍusahye tu deveśaṁ vasurūḍhe jagatpatim |

vallītaṭe mahāyogaṁ citrakūṭe narādhipam ||

nimiṣe pītavāsaṁ ca gavāṁ niṣkramaṇe harim |

śālagrāme tapovāsamacintyaṁ  gandhamādane ||

kubjāgāre hṛṣīkeṣaṁ gandhadvāre payodharam |

garuḍadhvajaṁ tu sakale govindaṁ nāma sāyake ||

vṛndāvane tu gopālaṁ mathurāyāṁ svayambhuvam |

kedāre mādhavaṁ vindyādvāraṇasyāṁ tu keśavam ||

puṣkare puṣkarākṣaṁ tu dhṛṣṭadyumne jayadhvajam |

tṛṇabinduvane vīramaśokaṁ sindhusāgare ||

kaseraṭe mahābāhumamṛtaṁ taijase vane |

viśvāsayūpe viśveśaṁ narasiṁhaṁ mahāvane ||

halāṅgare ripuharaṁ devaśālāṁ trivikramam |

puruṣottamaṁ daśapure kubjake vāmanaṁ viduḥ ||

vidyādharaṁ vitastāyāṁ vārāhe dharaṇīdharam |

devadāruvane guhyaṁ kāveryāṁ nāgaśāyinam ||

prayāge yogamūrtiṁ ca payoṣṇyāṁ ca sudarśanam |

kumāratīrthe kaumāraṁ lohite hayaśīrṣakam ||

ujjayinyāṁ trivikramaṁ liṅgakūṭe caturbhujam |

hariharaṁ tu bhadrāyāṁ dṛṣṭvā pāpātpramucyate ||

viśvarūpaṁ kurukṣetre manikuṇḍe halāyudham |

lokanāthamayodhyāyāṁ kuṇḍine kuṇḍineśvaram ||

bhāṇḍāre vāsudevaṁ tu cakratīrthe sudarśanam |

āḍhye viṣṇupadaṁ vidyācchūkare sūkaraṁ viduḥ ||

brahmeśaṁ mānase tīrthe daṇḍake śyāmalaṁ viduḥ |

trikūṭe nāgamokṣaṁ ca merupṛṣṭhe ca bhāskaram ||

virajaṁ puṣpabhadrāyāṁ bālaṁ keraḻake viduḥ |

yaśaskaraṁ vipāśāyāṁ māhiṣmatyāṁ hutāśanam ||

kṣīrābdhau padmanābhaṁ tu vimale tu sanātanam |

śivanadyāṁ śivakaraṁ gayāyāṁ ca gadādharam ||

sarvatra paramātmānaṁ yaḥ paśyati sa mucyate |

aṣṭaṣaṣṭiśca nāmāni kathitāni mayā tava ||

kṣetrāṇi caiva guhyāni kathitāni viśeṣataḥ |

etāni mama nāmāni rahasyāni prajāpate ||

yaḥ paṭhetprātarutthāya śṛṇuyādvāpi nityaśaḥ |

gavāṁ śatasahasrasya dattasya phalamāpnuyāt ||

dinedine śucirbhūtvā nāmānyetāni yaḥ paṭhet |

duḥsvapnaṁ na bhavettasya matprasādānna saṁśayaḥ ||

aṣṭaṣaṣṭi tu nāmāni trikālaṁ yaḥ paṭhennaraḥ |

vimuktaḥ sarvapāpebhyo mama loke sa modate ||

draṣṭavyāni yathā śaktyā kṣetrāṇyetāni mānavaiḥ |

vaiṣṇavaistu viśeṣeṇa teṣāṁ muktiṁ dadāmyaham ||

sūta uvāca

hariṁ samabhyarcya tadagrasaṁsthito

hariṁ smaran viṣṇudine viśeṣataḥ |

imaṁ stavaṁ yaḥ paṭhate samānavaḥ

prāpnoti viṣṇoramṛtātmakaṁ padam ||

|| iti śivam ||

www.kamakotimandali.com